# Munibhih Krita Devi Stuti

# મુનિભિઃ કૃતા દેવિસ્તુતિઃ

## Document Information

Text title : Munayah Krita Devi Stuti

File name : devistutiHmunibhiHkRRitA.itx

Category : devii, stuti, shivarahasya, pArvatI

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 37| 80-89 ||

Latest update : September 15, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# મુનિભિઃ કૃતા દેવિસ્તુતિઃ

નમો ગૌર્યૈ મહાગૌર્યૈ ભવાન્યૈ પ્રણતાં વયમ્ ।
પ્રણતા સા હિ ગિરિજે વિજ્વરાન્ કુરુ સાદરમ્ ॥ ૧॥

યત્કોપામ્બુધિલેશોઽયં જ્વરઃ સર્વાપહારકઃ ।
તાં નતાઃ સ્મ વયં સર્વે દુર્ગે દુર્ગાતિહારિણીમ્ ॥ ૨॥

અરુણપ્રાણસંહારકારણે કમલાનને ।
ભીમે દેવિ નમસ્તુભ્યં ભયાનિ હર સર્વથા ॥ ૩॥

વૈપ્રચિત્તમહાઘોરશરીરૌઘનિવર્હણે ।
શ્રીરક્તદન્તિકે ગૌરિ નમસ્તુભ્યં નમો નમઃ ॥ ૪॥

મહામાયે મહાદુર્ગે મધુનાશનકારિણિ ।
નમસ્તુભ્યં નમસ્તુભ્યં ભયં સંહર સંહર ॥ ૫॥

કૈટભપ્રાણહરણપ્રવીણે શિવવલ્લભે ।
નમસ્તુભ્યં નમસ્તુભ્યં પીડાં સંહર સંહર ॥ ૬॥

શાકમ્ભરિ જગદ્વન્દ્યે શશાઙ્કલલિતાલ કે ।
નમસ્તુભ્યં નમસ્તુભ્યં શઙ્કાતઙ્કાનિ સંહર ॥ ૭॥

ઉન્મત્તમહિષારાતિગર્વસંહારકારણે । (લક્ષણે)
નમસ્તુભ્યં નમસ્તુભ્યમાપન્નર્તિહરોદ્યમે ॥ ૮॥

(નમસ્તુભ્યં મહાદેવિ સર્વરોગવિનાશિનિ ।
ભ્રમરામ્બે નમસ્તુભ્યં શમ્બરારિબવિનાશિનિ ॥)
સેતુભૂપાલસંહારપ્રવીણે ચણ્ડલામ્બિકે ।
નમસ્તુભ્યં શિવેશાનિ ત્વયિ ભક્તિં પ્રયચ્છ નઃ ॥ ૯॥

નમસ્તે જગદાધારે ભવભારવિનાશિનિ ।
નમસ્તુભ્યં નમસ્તુભ્યં પરમાનન્દરૂપિણિ ॥ ૧૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મુનિભિઃ કૃતા દેવિસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૭। ૮૦-૮૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 37. 80-89 ..

Proofread by Ruma Dewan

---

*Munibhih Krita Devi Stuti*

pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*